# shrI subrahmaNya pUjAkalpaH

# શ્રીસુબ્રહ્મણ્ય પૂજાકલ્પઃ

## Document Information

Text title : shrii subrahmaNya puujaakalpaH

File name : subrahmanyapuujaakalpa.itx

Category : pUjA, subrahmanya, stotra

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્ય પૂજાકલ્પઃ

આદૌ વિઘ્નેશ્વર પૂજાં કૃત્વા ।
પ્રાર્થના ॥

શ્રી દેવસેનાધિપતે વલ્લીહૃત્ કઞ્જમન્દિરા ।
યાવત્ પૂજાં કરિષ્યેઽહં પ્રસન્નોભવ મે પ્રભો ॥

એવં સમ્પ્રાર્થ્ય - આસનં પરિકલ્પ્ય ॥

આચમ્ય ॥ ૐ અચ્યુતાય નમઃ । ૐ અનન્તાય નમઃ ।
ૐ ગોવિન્દાય નમઃ ॥

વિઘ્નેશ્વર ધ્યાનમ્ ॥

પ્રાણાયામ્ય ॥

મમોપાત્ત સમસ્ત/હરિરોં તત્ સત્યાદિ ... શુભે શોભને
મુહૂર્તે આદિ શુભતિથૌ પર્યંતે (અમુક ગોત્રોત્ભવસ્ય/
અમુક નક્ષત્રે અમુક રાશૌ જાતસ્ય અમુક નામ શર્મણઃ નામ્ન્યા
સહધર્મપત્ની પુત્ર પૌત્રસ્ય ), ( અસ્ય યજમાનસ્ય )
મમ સકુટુમ્બસ્ય ક્ષેમ સ્થૈર્ય વીર્ય વિજયાયુરારોગ્ય
ઐશ્વર્યાણાં અભિવૃદ્ધ્યર્થં  જ્ઞાનવૈરાગ્યસિદ્ધ્યર્થં,
સત્સન્તાન સમૃદ્ધ્યર્થં સર્વાભીષ્ટ સિદ્ધ્યર્થં
વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્ય પ્રસાદેન સકલ ચિન્તિત
મનોરથાવાપ્ત્યર્થં યથા શક્ત્યા યથા મિલિતોપચાર દ્રવ્યૈઃ
પુરાણોક્ત મન્ત્રૈશ્ચ ધ્યાનાવાહનાદિ ષોડશોપચારૈઃ
વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્યપૂજાં  કરિષ્યે । તદઙ્ગં
કલશ-શઙ્ખ-આત્મ-પીઠ પૂજાં ચ કરિષ્યે ॥ (એવં
કલશાદિ પૂજાં કૃત્વા)

અપવિત્રો પવિત્રો વા સર્વ અવસ્થાઙ્ગતોઽપિ વા ।

યઃ સ્મરેત્ પુણ્ડરીકાક્ષં સઃ બાહ્યાભ્યંતરઃ શુચિઃ ॥

એવં પૂજાદ્રવ્યાણિ આત્માનંચ પ્રોક્ષ્યાઃ ॥

અથ ધ્યાનમ્ ॥

સુબ્રહ્મણ્યમજં શાન્તં કુમારં કરુણાલયમ્ ।
કિરીટહારકેયૂર મણિકુણ્ડલ મણ્ડિતમ્ ॥ ૧॥

ષણ્મુખં યુગષડ્બાહું શૂલાદ્યાયુધધારિણમ્ ।
સ્મિતવક્ત્રં પ્રસન્નાભં સ્તૂયમાનં સદા બુધૈઃ ॥ ૨॥

વલ્લી દેવી પ્રાણનાથં વાઞ્છિતાર્થ પ્રદાયકમ્ ।
સિંહાસને સુખાસીનં સૂર્યકોટિ સમપ્રભમ્ ॥ ૩॥

એવં ધ્યાયેત્સદા ભક્ત્યાસ્વાન્તઃ કરણનિર્મલઃ ।
અસ્મિન્ ( બિમ્બે વા,ચિત્રપઠે વા,કુમ્ભે/કલશે
વા,મૃત્તિક બિમ્બે ) સાઙ્ગં સાયુધં સપરિવારં
સવાહનં સર્વશક્તિયુતં વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્યં
ધ્યાયામિ ॥

॥ આવાહનમ્ ॥

આવાહયામિ દેવત્વાં આશ્રિતાર્થ પ્રદાયિનમ્ ।
આમ્નાય વેદ્યવિભવં આદિમદ્ધ્યાન્ત વર્જિતમ્ ॥

અસ્મિન્ ( બિમ્બે વા,ચિત્રપઠે વા,કુમ્ભે /કલશે
વા,મૃત્તિક બિમ્બે ) સાઙ્ગં સાયુધં સપરિવારં
સવાહનં સર્વશક્તિયુતં વલ્લીદેવસેનાસમેત શ્રી
સુબ્રહ્મણ્યમાવાહયામિ ॥

પ્રાણપ્રતિષ્ઠા કૃત્વા ॥

॥ આસનમ્ ॥

રત્નસિંહાસનં ચારુરત્નસાનુધનુ:સુત ।
દદામિ દેવસેનેશ દયાકર ગૃહાણમે ॥

વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
રત્નસિંહાસનં સમર્પયામિ ॥

॥ પાદ્યમ્ ॥

પાદ્યં ગૃહાણ વલ્લીશ પાર્વતી પ્રિયનન્દન ।
પાપં પારય મે સર્વં પુત્રપૌત્રાન્ પ્રવર્દ્ધય ॥

વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ પાદ્યં સમર્પયામિ ॥

॥ અર્ઘ્યમ્ ॥

અર્ઘ્યં ગૃહાણ ગાંગેય દેવરાજસમર્ચિત ।
સફલાન્ કુરુ કામાન્ મે ષાણ્માતુર નમો નમઃ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ અર્ઘ્યં સમર્પયામિ ॥

॥ આચમનીયમ્ ॥

ગૃહાણાચમનં દેવ ગુણાસ્વામિન્ ગુણાલય ।
ગુરોરવિ ગુરો દેવ ગુરુમે કુશલં વિભો ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ આચમનીયં સમર્પયામિ ॥

॥ મધુપર્કમ્ ॥

મધુપર્કં ગૃહાણેમાં મધુસૂદન વન્દિત ।
મહાદેવસુતાનન્ત મહાપાતક નાશનમ્ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ મધુપર્કં સમર્પયામિ ॥

॥ પઞ્ચામૃત સ્નાન ॥

પઞ્ચામૃતેન પરમ પઞ્ચપાતક નાશન ।
સ્નાનં કુરુ સદારાદ્ધ્ય સુરસેનાપતેવ્યય ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ પઞ્ચામૃત સ્નાનં સમર્પયામિ ॥

॥ સ્નાનમ્ ॥

દેવસિન્ધુ સમુદ્ભૂત ગઙ્ગાધર તનુભવ ।
સ્નાનં સ્વીકુરુ સર્વેશ ગઙ્ગાદિ સલિલૈઃ શિવૈઃ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ સ્નાનં
સમર્પયામિ ॥ સ્નાનાનન્તરં આચમનીયં ચ સમર્પયામિ ॥

॥ વસ્ત્રમ્ ॥

વસ્ત્રયુગ્મં ચ વલ્લીશ વારિતાખિલ પાતક ।
સુવર્ણતન્તુભિઃ સ્યૂતં ગૃહ્યતાં ગુહ ષણ્મુખ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ વસ્ત્રં
સમર્પયામિ ॥

॥ ઉપવીતમ્ ॥

રજતં બ્રહ્મસૂત્રં ચ કાઞ્ચનંચોત્તરીયકમ્ ।
દદામિ દેવસેનેશ ગૃહાણ ગુણસાગર ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ ઉપવીતં
સમર્પયામિ ॥

॥ વિભૂતિ ॥

અગ્નિહોત્રસમુત્ભૂતં વિરજાનલસંભવમ્ ।
ગૃહાણ ભસિતં દેવ ભૂતબાધ વિનાશન ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ વિભૂતિં
સમર્પયામિ ॥

॥ ગન્ધમ્ ॥

કસ્તૂરી કુઙ્કુમોપેતં ઘનસાર સમન્વિતમ્ ।
ગૃહાણ રુચિરં ગન્ધ મન્ધકારિતનૂભવ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ ગન્ધમ્ ધારયામિ ॥

॥ અક્ષતા ॥

અક્ષતાન્ ધવલાન્ રમ્યાન્ હરિદ્રાચૂર્ણમિશ્રિતાન્ ।
કુમાર કરુણાસિન્ધો ગૃહાણ ગુણભૂષણ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ અક્ષતાન્
સમર્પયામિ ॥

॥ નાનાવિધ પુષ્પાણિ ॥

પારિજાતાનિનીપઞ્ચ પારિજાતાનિ માલતીમ્ ।
પુન્નાગં બિલ્વપત્રશ્ચ ગૃહાન ક્રૌઞ્ચદારણ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ નાનાવિધ
પરિમળ પુષ્પાણિ સમર્પયામિ ॥

અથ અઙ્ગપૂજા ॥

પાર્વતી નન્દનાય નમઃ પાદૌ પૂજયામિ ।
ગુહાય નમઃ ગુલ્ફૌ પૂજયામિ ।
જગન્નાથાય નમઃ જાનુની પૂજયામિ ।
ઉરુબલાય નમઃ ઊરુ પૂજયામિ ।
કૃત્તિકાસુતાય નમઃ કટિં પૂજયામિ ।
ગુહાય નમઃ ગુહ્યં પૂજયામિ ।
કુમારાય નમઃ કુક્ષિં પૂજયામિ ।
નારાયણીસુતાય નમઃ નાભિં પૂજયામિ ।
વિશાખાય નમઃ વક્ષઃ પૂજયામિ ।
કૃત્તિકાસૂનધાયાય નમઃ સ્તનૌ પૂજયામિ ।
બહુલાસુતાય નમઃ બાહૂન્ પૂજયામિ ।
હરસૂનવે નમઃ હસ્તાન્ પૂજયામિ ।
કાર્તિકેયાય નમઃ કણ્ઠં પૂજયામિ ।
ષણ્મુખાય નમઃ મુખાનિ પૂજયામિ ।
સુનાસાય નમઃ નાસિકાઃ પૂજયામિ ।
દેવનેત્રે નમઃ નેત્રાણિ પૂજયામિ ।
હિરણ્યકુણ્ડલાય નમઃ કર્ણાન્ પૂજયામિ ।
સર્વફલપ્રદાય નમઃ ફાલં પૂજયામિ ।
કરુણાકરાય નમઃ કપોલૌ પૂજયામિ ।
શરવણભવાય નમઃ શિરાંસિ પૂજયામિ ।
કુક્કુટધ્વજાય નમઃ કચાન્ પૂજયામિ ।
સર્વમઙ્ગલપ્રદાય નમઃ સર્વાણ્યઙ્ગાનિ પૂજયામિ ॥

અથ અષ્ટોત્તરશતનામવલ્યા વા  સહસ્રનામાવલ્યા વા
પુષ્પાક્ષતાર્ચનં કૃત્વા ॥

॥ ધૂપઃ ॥

દશાઙ્ગં ગુગ્ગુલૂપેતં સુગન્ધંચ મનોહરમ્ ।
ધૂપં ગૃહાણ દેવેશ ધૂતપાપ નમોઽસ્તુતે ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
ધૂપમાઘ્રાપયામિ ॥

॥ દીપઃ ॥

સાજ્યવર્તિ ત્રયોપેતં દીપં પશ્ય દયાનિધે ।
દેવસેનાપતે સ્કન્દ વલ્લીનાથ વરપ્રદ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ દીપં
દર્શયામિ । ધૂપદીપાનન્તરં આચમનીયં સમર્પયામિ ॥

॥ નૈવેદ્યમ્ ॥

ૐ ભૂર્ભુવઃસુવઃ તત્સવિતુર્વરેણ્યં + બ્રહ્મણે સ્વાહા ।
શાલ્યન્નં પાયસં ક્ષીરં લડ્ઢુકાન્ મોદકાનપિ ।
ગૃહાણ કૃપયા દેવ ફલાનિ સુબહુનિચ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
મહાનૈવેદ્યં નિવેદયામિ ॥ મધ્યે મધ્યે અમૃત પાનીયં
સમર્પયામિ । અમૃતોપિધાન્યમસિ । નૈવેદ્યાનન્તરં આચમનીયં
સમર્પયામિ ॥

॥ મહા ફલમ્ ॥

ઇદં ફલં મયાદેવ સ્થાપિતં પુરતસ્થવ ।
તેન મે સફલાવાપ્તિર્ભવેત્ જન્મનિજન્મનિ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ મહાફલં
સમર્પયામિ ॥

॥ તામ્બૂલમ્ ॥

પૂગીફલાનિરમ્યાણિ નાગવલ્લીદલાનિચ ।
ચૂર્ણંચ ચન્દ્રસંકાશં ગૃહાણ શિખિવાહન ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ તામ્બૂલં

સમર્પયામિ ॥

॥ કર્પૂર નીરાજન દીપઃ ॥

નીરાજનમિદં રમ્યં નીરજાજન સંસ્તુત ।
ગૃહાણ કરુણા સિન્ધો કામિતાર્થ પ્રદાયક ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ કર્પૂર
નીરાજન દીપં પ્રદર્શયામિ ॥ નીરાજનાનન્તરં આચમનીયં
સમર્પયામિ ॥

॥ પુષ્પાઞ્જલિઃ ॥

પુષ્પાઞ્જલિં ગૃહાણેશ પુરુષોત્તમ પૂજિત ।
મયૂરવહદેવેશા મનીષિતફલપ્રદ ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
પુષ્પાઞ્જલિં સમર્પયામિ ॥

॥ મન્ત્રપુષ્પમ્ ॥

યોઽપાં પુષ્પં વેદ ... ભવતિ ।
વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ વેદોક્ત
મન્ત્રપુષ્પં સમર્પયામિ ॥

॥ પ્રદક્ષિણમ્ ॥

પ્રદક્ષિણં કરોમિ ત્વાં પ્રકૃષ્ટ ફલદાયિનમ્ ।
પુરુષોત્તમ સમ્પૂજ્ય પુત્રપૌત્રાન્ પ્રવર્દ્ધ્ય ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ પ્રદક્ષિણં
સમર્પયામિ ॥

॥ નમસ્કારઃ ॥

નમો ગૌરીતનૂજાય ગાઙ્ગેયાય નમો નમઃ ।
નમો દેવવરાર્ચ્યાય વલ્લીશાય નમો નમઃ ॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષ રક્ષ ગુહેશ્વર ॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ નમસ્કારાન્

સમર્પયામિ ॥

વિદ્યાં દેહિ યશો દેહિ પુત્રાન્ દેહિ સથાયુષઃ ।
ત્વયિ ભક્તિં પરાં દેહિ પરત્રચ પરાંગતિમ્ ॥

ઇતિ પ્રાર્થનામિ ॥

॥ અર્ઘ્યપ્રધાનઃ ॥

"અદ્ય પૂર્વોક્ત વિશેષણ વિશિષ્ટાયાં અસ્યાં શુભતિથૌ
વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય પ્રસાદસિદ્ધ્યર્થં,
પૂજાન્તે ક્ષીરાર્ઘ્યપ્રદાનં ઉપાયનદાનં ચ કરિષ્યે" ઇતિ
સઙ્કુલ્પ્ય ।
સુબ્રહ્મણ્ય મહાભાગ કાર્તિકેય સુરેશ્વર ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવ સર્વદા ॥ ૧॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
ઇદમર્ઘ્યમિદમર્ઘ્યમિદમર્ઘ્યમ્ ।
વલ્લીશ પાર્વતીપુત્ર વ્રતસમ્પૂર્તિહેતવે ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ પ્રસીદ શિખિવાહન ॥ ૨॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
ઇદમર્ઘ્યમિદમર્ઘ્યમિદમર્ઘ્યમ્ ।

રોહિણીશ મહાભાગ સોમસોમ વિભૂષણ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવસર્વદા ॥ ૩॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
ઇદમર્ઘ્યમિદમર્ઘ્યમિદમર્ઘ્યમ્ ।

નીલકણ્ઠ મહાભાગ કાર્તિકેયસ્ય વાહન
ઇદમર્ઘ્યં પ્રદાસ્યામિ પ્રસીદ શિખિવાહન ॥ ૪॥

વલ્લીદેવસેના સમેત શ્રી સુબ્રહ્મણ્ય સ્વામિને નમઃ
ઇદમર્ઘ્યમિદમર્ઘ્યમિદમર્ઘ્યમ્ ।

અન્યેન મયા કૃતેન યથાજ્ઞેન યથાશક્ત્યા યથામિલિતોપચાર
દ્રવ્યૈઃ પૂજન, અર્ઘ્યપ્રદાનેન ચ ભગવાન્ સર્વાત્મકઃ
વલ્લીદેવસેનાસમેત શ્રી સુબ્રહ્મણ્યઃ સુપ્રીતઃ સુપ્રસન્નો વરદો

ભવતુ ॥

॥ ઉપાયનદાન શ્લોકઃ ॥

ઉપાયનં ચ વિપ્રાય દદામિ ફલસંયુતમ્ ।
અનેન પ્રીયતાં દેવઃ સદાશરવનોત્ભવ ॥

॥ ક્ષમા પ્રાર્થના ॥

યદક્ષર પદભ્રષ્ટં માત્રા હીનન્તુ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ શિવસૂનુ નમોઽસ્તુતે ॥

વિસર્ગ બિન્દુ માત્રાણિ પદ પાદાક્ષરાણિ ચ ।
ન્યૂનાનિચાતિરિક્તાનિ ક્ષમસ્વ પુરુષોત્તમ ॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપઃ કાર્યાક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં સુરેશ્વર ।
યત્પૂજિતં મયાદેવ પરિપૂર્ણં તદસ્તુ મે ॥

અપરાધ સહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોઽયં ઇતિ માં મત્વા ક્ષમસ્વ પુરુષોત્તમ ॥

॥ સમર્પણમ્ ॥

કાયેન વાચા મનસેન્દ્રિયેર્વા, બુદ્ધ્યાત્મના વા પ્રક્રિતેઃ સ્વભાવાત્ ।
કરોમિ યદ્ યદ્ સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥

॥ ૐ તત્ સત્ બ્રહ્માર્પણમસ્તુ ॥

॥ ઇતિ શ્રી સુબ્રહ્મણ્ય પૂજાકલ્પઃ ॥

Encoded and proofread by antaratma at Safe-mail.net

*shrI subrahmaNya pUjAkalpaH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*